## *Puruṣasūktam*

A salutation to the creator describing how creation began and how the creator, *Puruṣa*, is beyond the created, this chant from the *Taittirīya-āraṇyaka* (3.12,13) is rendered on all occasions, from birth to death. Creation includes the manifest and the un-manifest. According to this chant, the earth mother (*Bhū*) and the goddess of wealth (*Lakṣmī*) are the consorts of the *Puruṣa*, eternally serving him. This represents the idea that the dual foundations of patience and good resources, represented by *Bhū* and *Lakṣmī* are essential in the process of creation.

---

Ce chant extrait de la *Taittirīya-āraṇyaka* (3.12, 13) est une salutation au créateur, décrivant comment la création a débuté et comment le créateur, *Puruṣa*, est au-delà de la création. Ce chant est effectué  en toute occasion, de la naissance à la mort. La création inclut le manifesté et le non-manifesté. Selon ce chant, la Terre mère (*Bhū*) et la Déesse de prospérité (*Lakṣmī*) sont les deux compagnes de *Puruṣa*, le servant éternellement. Ceci représente l'idée que la double fondation de la patience (représentée par *Bhū*) et des ressources (représentées par *Lakṣmī*), est essentielle dans le processus de création.

---

Dieser Chant ist ein Gruß an den Schöpfer, in welchem beschrieben wird, wie die Schöpfung begann und wie der Schöpfer *Puruṣa* über die Schöpfung hinausragt und mehr ist als das Geschaffene. Dieser Chant aus der *Taittirīya-āraṇyaka* (3.12, 13) wird bei allen Gelegenheiten, von der Geburt bis zum Tod, verwendet. Die Schöpfung umfasst das Manifeste und das Nicht Manifeste. Die Mutter Erde (*Bhū*) und die Göttin des Reichtums (*Lakṣmī*) sind die zwei Gemahlinnen des *Puruṣa*. Sie dienen ihm, diesem Chant entsprechend, ewig. Dies repräsentiert die Idee, dass für die Schöpfung sowohl Geduld (Erde) als auch eine gute Grundlage (*Lakṣmī),* wesentlich sind.

# ॥ पुरुषसूक्तम् ॥

ओं तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे । ओं शान्तिः शान्तिः शान्तिः ।

सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् । पुरुष एवेद९ सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति । एतावानस्य महिमा । अतो ज्यायाग्ंश्च पूरुषः ॥ १ ॥

पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाऽऽभवात्पुनः । ततो विष्वङ्व्यक्रामत् । साशनानशने अभि । तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ २ ॥

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः । सप्तास्यासन्परिधयः । त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ॥ ३ ॥

तेन देवा अयजन्त । साध्या ऋषयश्च ये । तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् । पशूग्स्ताग्श्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये । तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे । छन्दा९सि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ ४ ॥

# || Puruṣasūktam ||

oṁ tacchaṁ yorāvṛṇīmahe | gātuṁ yajñāya | gātuṁ yajñapataye | daivī svastirastu naḥ | svastirmānuṣebhyaḥ | ūrdhvaṁ jigātu bheṣajam | śaṁ no astu dvipade | śaṁ catuṣpade | oṁ śāntiḥ śāntiḥ śāntiḥ |

sahasraśīrṣā puruṣaḥ | sahasrākṣaḥ sahasrapāt | sa bhūmiṁ viśvato vṛtvā | atyatiṣṭhaddaśāṅgulam | puruṣa evedagṁsarvam | yadbhūtaṁ yacca bhavyam | utāmṛtatvasyeśānaḥ | yadannenātirohati | etāvānasya mahimā | ato jyāyāgśca pūruṣaḥ || 1 ||

pādo'sya viśvā bhūtāni | tripādasyāmṛtaṁ divi | tripādūrdhva udaitpuruṣaḥ | pādo'syehā''bhavātpunaḥ | tato viṣvaṅvyakrāmat | sāśanānaśane abhi | tasmādvirāḍajāyata | virājo adhi pūruṣaḥ | sa jāto atyaricyata | paścādbhūmimatho puraḥ || 2 ||

yatpuruṣeṇa haviṣā | devā yajñamatanvata | vasanto asyāsīdājyam | grīṣma idhmaśśaraddhaviḥ | saptāsyāsanparidhayaḥ | triḥ sapta samidhaḥ kṛtāḥ | devā yadyajñaṁ tanvānāḥ | abadhnanpuruṣaṁ paśum | taṁ yajñaṁ barhiṣi praukṣan | puruṣaṁ jātamagrataḥ || 3 ||

tena devā ayajanta | sādhyā ṛṣayaśca ye | tasmādyajñātsarvahutaḥ | sambhṛtaṁ pṛṣadājyam | paśūgstāgścakre vāyavyān | āraṇyāngrāmyāśca ye | tasmādyajñātsarvahutaḥ | ṛcaḥ sāmāni jajñire | chandāgṁsi jajñire tasmāt | yajustasmādajāyata || 4 ||

तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ॥ ५ ॥

ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳ शूद्रो अजायत । चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाꣳ अकल्पयन् ॥ ६ ॥

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तुपारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते । धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥ ७ ॥

अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ॥ ८ ॥

तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे ॥ ९ ॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ १० ॥

tasmādaśvā ajāyanta | ye ke co'bhayādataḥ | gāvo ha jajñire tasmāt | tasmājjātā ajāvayaḥ | yatpuruṣaṁ vyadadhuḥ | katidhā vyakalpayan | mukhaṁ kimasya kau bāhū | kāvūrū pādāvucyete | brāhmaṇo'sya mukhamāsīt | bāhū rājanyaḥ kṛtaḥ || 5 ||

ūrū tadasya yadvaiśyaḥ | padbhyāgṁśūdro ajāyata | candramā manaso jātaḥ | cakṣoḥ sūryo ajāyata | mukhādindraścāgniśca | prāṇādvāyurajāyata | nābhyā āsīdantarikṣam | śīrṣṇo dyauḥ samavartata | padbhyāṁ bhūmirdiśaḥ śrotrāt | tathā lokāgṁ akalpayan || 6 ||

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasastupāre | sarvāṇi rūpāṇi vicitya dhīraḥ | nāmāni kṛtvā'bhivadan yadāste | dhātā purastādyamudājahāra | śakraḥ pravidvānpradiśaścatasraḥ | tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā ayanāya vidyate | yajñena yajñamayajanta devāḥ | tāni dharmāṇi prathamānyāsan | te ha nākaṁ mahimānaḥ sacante | yatra pūrve sādhyāḥ santi devāḥ || 7 ||

adbhyaḥ saṁbhūtaḥ pṛthivyai rasācca | viśvakarmaṇaḥ samavartatādhi | tasya tvaṣṭā vidadhadrūpameti | tatpuruṣasya viśvamājānamagre | vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasaḥ parastāt | tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā vidyate'yanāya | prajāpatiścarati garbhe antaḥ | ajāyamāno bahudhā vijāyate || 8 ||

tasya dhīrāḥ parijānanti yonim | marīcīnāṁ padamicchanti vedhasaḥ | yo devebhya ātapati | yo devānāṁ purohitaḥ | pūrvo yo devebhyo jātaḥ | namo rucāya brāhmaye | rucaṁ brāhmaṁ janayantaḥ | devā agre tadabruvan | yastvaivaṁ brāhmaṇo vidyāt | tasya devā asan vaśe || 9 ||

hrīśca te lakṣmīśca patnyau | ahorātre pārśve | nakṣatrāṇi rūpam | aśvinau vyāttam | iṣṭaṁ maniṣāṇa | amuṁ maniṣāṇa | sarvaṁ maniṣāṇa || 10 ||